श्रीमते रामानुजाय नमः

# ॥ श्री रघुवीर सुप्रभातम्॥

भुत्यस्व वत्स तव विक्रमकाल एष
यागान्तराय करणाय नभोन्तराळात्।
सिद्धाश्रमस्य सविधे बहुधा पतन्ति
रक्षोगणा रघुपते! तव सुप्रभातम्॥ १

आरोहणाय तव पादयुगेन मूर्ध्ना
बिभ्राण एष भ्रतो मणिपादुके द्वे।
निर्वर्त्य सान्ध्यविधि मद्य पुरोहितेन
त्वामीक्षते रघुपते! तव सुप्रभातम्॥ २

श्रीदण्डकावन तपोधन पुङ्गवास्त्वां
त्रातारमाश्रितवतां शरणं प्रपन्नाः।
पादाशतात् प्रचकिता मुहुरद्य रक्षो
यूथाहितात्द् रघुपते! तव सुप्रभातम्॥ ३

संप्राप्य वालिमथनस्य तवाभ्यनुज्ञां
सिंहासनं समधिरोढुमनास् तदीयम्।
सुग्रीव एष शिरसा चरणौ नमस्ते
बद्धाञ्जली रघुपते! तव सुप्रभातम्॥ ४

श्रोत्र द्वये तव दशास्य पुरे प्रदृष्ट
सीतेति सुप्रिय वचोम्रुत वर्षणाय।
संप्राप्त एष हनुमान् कृतकार्यवर्गो
यूथैः समं रघुपते! तव सुप्रभातम्॥ ५

श्रीमते रामानुजाय नमः

दुष्टे हते दशमुखे भवदः स्वरूप
या थार्थ्य बो धन कृते सकलस्य जन्तोः।
ब्रह्मेश मुख्य विबुत प्रवराः समेताः
सेवार्थिनो रघुपते! तव सुप्रभातम्॥ ६

मेध्याश्व मेध समयेत्र तवाङ्घ्रि युग्मे
वाल्मीकिरेष भगवान् जगतां हिताय।
सीतां सतीं कुशलवौ च समर्पयिष्यन्
प्रेम्णागतो रघुपते! तव सुप्रभातम्॥ ७

वाल्मीकि रामायण सप्तकाण्ड
सारार्थ रत्नावळि हृद्यमेतत्।
श्रीसुप्रभातं प्रपठन्ति येत्र
ते सप्तलोकी मतियन्ति चान्त्॥ ८

**॥ इति श्री रघुवीर सुप्रभातं संपूर्णम्॥**